अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥ (म. भा. ३. ३५१)

'अच उपसर्गात्तः' (७.४.४७/३०७८) इति [1]प्राप्ते निपात्यन्ते । अनुपसर्गा वा एते अवादयः [2]क्रियान्तर–विषया वेदितव्याः ॥

## अच उपसर्गात्तः । (४७/३०७८)

अजन्तादुपसर्गादुत्तरस्य दा इत्येतस्य घुसंज्ञकस्य त इत्ययमादेशो भवति तकारादौ किति[3] । प्रत्तम् । अवत्तम् । नीत्तम् । परीत्तम् । अचः इति किम्? निर्दत्तम् । दुर्दत्तम् । उपसर्गात् इति किम् ? दधि दत्तम् । मधु दत्तम् । घोः इत्येव, अवदातम् मुखम् ।

उपसर्गात् इति पञ्चमीनिर्देशाद् आदेरलः प्राप्नोति ? तत्र समाधिमाहुः । अचः इत्येतद् द्वि[4]रावर्तयितव्यम्, तत्र एकं पञ्चम्यन्तं उपसर्गविशेषणार्थम्, अपरमपि षष्ठयन्तं स्थानिनिर्देशार्थमित्याकारस्य स्थाने तकारो [5]भवति । द्वितकारो वा संयोगोऽयमादिश्यते, सोऽनेकाल्त्वात् [6]सर्वस्य भविष्यति । 'अपो भि' (७. ४. ४८/४४२) इत्यत्र पञ्म्यन्तमचः इत्यनुवर्तते । तेन पकारमात्रस्य भविष्यति ।

[८७४] द्यतेरित्त्वादचस्त इत्येतद् भवति विप्रतिषेधेन । (म. भा. ३. ३५१)

[7]अवत्तम् । प्रत्तं (मै. १. ६. ९) जुहोति ॥

## अपो भि । (४८/४४२)

अप् इत्येतस्याङ्गस्य भकारादौ प्रत्यये परतः त इत्ययमादेशो भवति । अद्भिः । अद्भ्यः । भि इति किम् ? अप्सु ।

[८७५] स्ववःस्वतवसोर्मास उषसश्च तकारादेश इष्यते छन्दसि भकारादौ । (म. भा. ३. ३५२)

स्ववद्भिः । [8]स्वतवद्भिः । [9]माद्भिरिष्ट्वा इन्द्रो वृत्रहा । 'समुषद्भिरजायथाः' (ऋ. १. ६. ३) ॥

## सः स्यार्धधातुके । (४९/२३४२)

[10]सकारान्तस्य अङ्गस्य सकारादौ आर्धधातुके परतः तकारादेशो भवति । वत्स्यति । अवत्स्यत् । विवत्सति । जिघत्सति । सः इति किम् ? वक्ष्यति । सि इति किम् ? [11]घासः । वासः । आर्धधातुके इति किम् ? [12]आस्से । वस्से ॥

---

1. तकारे इत्यधिकम् ह. 2. क्रियाविशेषाः क, क्रियान्तरविषये इ. 3. प्रत्यये इत्यधिकम् इ. 4. आवर्तते ब. 5. विधीयते ह. 6. समग्रस्य ब. 7. चतुरवत्तं जुहोति ह. 8. स्वतवद्भ्यः (मै. 1. 10. 6.) 9. माद्भिरिष्टः क, माद्भिस्त्वा चन्द्रो वृत्रहा शौ. 19. 2. परिवाम् इन्द्रो वृत्रहा पै. 20. 61. 10. त इति वर्तते इत्यधिकम् इ. ह. 11. प्रघासः ह. 12. आस्व वस्व इ.